गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः। अग्निः। जगती

**यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा।**
**समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम्॥ २.००२.०१**

समिधानम्- सम्यगिद्धम्। सुप्रयसम्- शोभनान्नम्। स्वर्णरम्- स्वर्गनेतारम्। द्युक्षम्- दीप्तम्। होतारम्- देवाह्वातारम्। वृजनेषु- सैन्येषु। धूर्षदम्- बलकर्तारम्। जातवेदसम्- जातविद्यम्। अग्निम्- पावकं सर्वभूतहितक्रतुम्। यज्ञेन- दानेन पूजया सङ्गतिकरणेन। वर्धत- वर्धयत। तना- विस्तृतया। गिरा- वाचा। यजध्वम्- पूजयत ॥१॥

**अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः।**
**दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः॥ २.००२.०२**

पुरुवार- बहुभिर्वरणीय। अग्ने- पावक सर्वभूतहितक्रतो। स्वसरेषु- गोष्ठेषु। धेनवः- गावः। वत्सम्- शावम्। न- इव। त्वा- भवन्तम्। नक्तीरुषसः- दिवारात्रम्। अभि ववाशिरे- उपासकाः कामयन्ते। दिव इव- नभो यथा तथा। अरतिः- रागरहितः सन्। मानुषा युगा क्षपः- मनुष्यप्रज्ञाप्रतीकनिशा अपि। संयतः- नियमयुक्तः सन्। भासि- प्रकाशयसि ॥२॥

**तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे।**
**रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम्॥ २.००२.०३**

रजसः- लोकस्य। बुध्ने- मूले। सुदंससम्- सुदर्शनम्। दिवस्पृथिव्योः- द्यावापृथिव्योर्मध्यस्थम्। अरतिम्- रागरहितम्। रथमिव वेद्यम्- रथमिव लक्ष्यप्रापकमिति भावः। शुक्रशोचिषम्- शुभ्रप्रकाशम्। मित्रं न- सखायमिव स्थितम्। प्रशस्यम्- स्तुत्यम्। तम्- अमुमग्निम्। देवाः- द्योतनशक्तयः। न्येरिरे- प्रेरितवन्तः ॥३॥

Dr. Rangan ji
WEBOLIM

**तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः।**
**पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु॥ २.००२.०४**

पृश्न्याः पतरम्- द्युलोके पतन्तम्। अक्षभिः- दर्शनैः। चितयन्तम्- चेतयमानम्। पाथो न पायुम्- उदकमिव पालकम्। उभे जनसी- जनयित्र्यौ द्यावापृथिव्यौ। अनु। स्थितम्। रजसि- लोके। उक्षमाणम्- सिञ्चन्तम्। चन्द्रमिव- सोममिव। सुरुचम्- सुष्ठु रोचमानम्। स्वे दमे- स्वकीयसदने। आ- आभिमुख्येन। ह्वारे- स्वध्याने। आ दधुः- उपासका धारयन्ति ॥४॥

**स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा।**
**हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु॥ २.००२.०५**

सः- असौ। होता- देवाह्वाता। विश्वम्- सर्वम्। अध्वरम्- सर्वलोकहितं ध्वररहितं कर्म। परि भूतु- परितो भवतु। तम्। हव्यैः- चरुपुरोडाशध्यानभावनादिहव्यैः। गिरा- मन्त्रेण। मनुषः- उपासकाः। ऋञ्जते- मण्डयन्ति। हिरिशिप्रः- आहरणशीलनासिकायुक्तः। प्राणायामपर इति भावः। वृधसानासु- वर्धमानासु भावनासु। जर्भुरत्- पूर्यमाणो गन्ता भवति। रोदसी- द्यावापृथिव्यौ। अनु। द्यौर्न- नभ इव। स्तृभिः-स्वव्याप्तिभिः। स्तृञ् आच्छादने। चितयत्- चेतयति ॥५॥

**स नो रेवत्समिधानः स्वस्तये संददस्वान्रयिमस्मासु दीदिहि।**
**आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये॥ २.००२.०६**

सः- असौ त्वम्। नः- अस्मभ्यम्। समिधानः- उद्दीपितः। स्वस्तये- मङ्गळाय। रेवत् रयिम्- दानयोग्यधनम्। संददस्वान्- प्रयच्छन्। अस्मासु। दीदिहि- प्रदीप्तो भव। रोदसी- द्यावापृथिव्यौ। नः- अस्माकम्। सुविताय- शोभनाय। आ कृणुष्व- कुरु। अग्ने। देव। मनुषः- मनुष्यदत्तानि। हव्या- हव्यानि। वीतये- भक्षणाय। कुरु ॥६॥

**दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि।**

Dr. Rangan
WEBOLIM

**प्राची द्यावापृथिवी ब्रह्मणा कृधि स्व१र्ण शुक्रमुषसो वि दिद्युतः॥ २.००२.०७**

अग्ने। बृहतः- महतः। सहस्रिणः- प्रभूतान्। नः- अस्मभ्यम्। दाः- देहि। न वाजम्- अन्नभण्डारद्वारमिव। दुरः-श्रुतिभण्डारद्वारम्। श्रुत्यै- श्रुतिग्रहणाय। अपा वृधि- अपावृणु। प्राची- प्राचीने। द्यावापृथिवी- द्यावापृथिव्यौ। ब्रह्मणा- मेधया। कृधि- कुरु। उषसः- विद्याः। स्वर्ण शुक्रम्- दीप्तं स्वर्गम्। वि दिद्युतुः- विशेषेण द्योतयन्ति ॥७॥

**स इधान उषसो राम्या अनु स्व१र्ण दीदेदरुषेण भानुना।**
**होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे॥ २.००२.०८**

होत्राभिः- वाग्भिः। मनुषः- मनुष्यस्य। स्वध्वरः- शोभनकर्मप्रेरकः। राजा- स्वामी। विशाम्- प्रजानाम्। अतिथिः। आयवे- मनुष्याय। चारुः- कल्याणः। सः- असावग्निः सर्वभूतहिक्रतुः। इधानः- उद्दीपितः। राम्याः- रमणीयाः। उषसः- विद्याः। अनु। स्वर्ण- आत्मसूर्य इव। अरुषेण भानुना- स्वप्रकाशेन। दीदेत्- दीपयति। ॥८॥

**एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा।**
**दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि॥ २.००२.०९**

बृहद्दिवेषु अमृतेषु पूर्व्य- देवेषु प्राचीन। अग्ने- सर्वभूतहितक्रतो। एव- इत्थम्। नः- अस्माकम्। मानुषा धीः- धारणा। पीपाय- प्याययति। वृजनेषु- दुःखेषु। कारवे- अग्न्युपासकाय। त्मना- आत्मना। इषणि- सदेषणायाम्। शतिनं पुरुरूपम्- प्रभूतदैवीसम्पदाम्। धेनुः- अदितिः। दुहाना- दोग्ध्री भवति ॥९॥

**वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति।**
**अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्व१र्ण शुशुचीत दुष्टरम्॥ २.००२.१०**

Dr.Ranganji
WEBOLIM

अग्ने- सर्वभूतहितक्रतो। वयम्। अर्वता- प्राणेन। ब्रह्मणा- मेधया मन्त्रेण वा। जनान् अति- अन्तरायभूतान् जनानतिक्रम्य। सुवीर्यम्। चितयेम- जानीमः। पञ्च कृष्टिषु- पञ्चजनेषु ब्राह्मणक्षत्रियवैश्यशूद्रनिषादेषु। उच्चा- उत्कृष्टम्। स्वर्ण- सूर्यमिव। अस्माकम्। दुष्टरम्- अनतिक्रमितव्यम्। द्युम्नम्- ज्ञानम्। शुशुचीत- प्रकाशय ॥१० ॥

**स नो॑ बोधि सहस्य प्र॒शंस्यो॒ यस्मि॑न्सुजा॒ता इ॒षय॑न्त सू॒रयः॑।**
**यम॑ग्ने य॒ज्ञमु॑प॒यन्ति॑ वा॒जिनो॒ नित्ये॑ तो॒के दी॑दि॒वांसं॒ स्वे दमे॑॥ २.००२.११**

अग्ने। सः- असौ त्वम्। सहस्य- सहसो जात। प्रशंस्यः- स्तुत्यः सन्। यस्मिन्। सुजाताः- शोभनजन्मानः। सूरयः- विद्वांसः। इषयन्त- त्वामिच्छन्ति। यम्। नित्ये तोके- भवतः नित्यवत्सभूतस्य मम। स्वे। दमे- सदने। दीदिवांसम्- ज्वलन्तम्। यज्ञम्। वाजिनः- भवदीयाः प्राणभूता अश्वाः। उपयन्ति- उपगच्छन्ति। नः- अस्माकं तस्मिन्यज्ञे। बोधि- जागृहि ॥११ ॥

**उ॒भया॑सो जातवेदः स्याम ते स्तो॒तारो॑ अग्ने सू॒रय॑श्च॒ शर्म॑णि।**
**वस्वो॑ रा॒यः पु॑रुश्च॒न्द्रस्य॒ भूय॑सः प्र॒जाव॑तः स्वप॒त्यस्य॑ शग्धि नः॥ २.००२.१२**

जातवेदः- जातविद्य। अग्ने- सर्वभूतहितक्रतो। ते- तव। शर्मणि- कल्याणगुणे। स्तोतारः- प्रशंसकाः। सूरयश्च- मेधाविनश्च। उभयासः- उभयलम्भकाः। स्याम- भवेम। नः- अस्मभ्यम्। वस्वः- निवासभूताम्। पुरुश्चन्द्रस्य- आह्लादकरीम्। भूयसः- प्रभूताम्। प्रजावतः स्वपत्यस्य- शोभनपुत्रपौत्ररूपिणीम्। रायः- सम्पदम्। शग्धि- प्रयच्छ ॥१२ ॥

**ये स्तो॒तृभ्यो॒ गोअ॑ग्रा॒मश्व॑पेशस॒मग्ने॑ रा॒तिमु॑पसृ॒जन्ति॑ सू॒रयः॑।**
**अ॒स्माञ्च॒ ताँश्च॒ प्र हि नेषि॒ वस्य॒ आ बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑॥ २.००२.१३**

पूर्वं व्याख्यातम् (२.१.१६) ॥१३ ॥

Dr. Rangaji
WEBOLIM